**Kaumodaki : Journal of Multidisciplinary Studies**
[ A Peer-Reviewed, Open Access Journal; Indexed in NepJOL ]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Committee, Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# शब्दार्थसम्बन्धानामनुशीलनम्

**भोलानारायणरेग्मी**
Department of Vyakaran (Sanskrit Grammar), Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History* : *Submitted 01 Sept. 2021; Reviewed 29 Sept. 2021; Revised 25 Oct. 2021***
***Corresponding Author* : *Bhola Narayan Regmi,* *Email* : *bhola.regmi@nsu.edu.np***
***DOI* : *https://doi.org/......***

**सारः**

*प्रस्तुतोऽयं लेखो दर्शनपक्षाऽभिमतवैयाकरणराद्धान्ते सुप्रसिद्धशब्दार्थसम्बन्धानुशीलने नित्यत्वाऽनित्यत्वे च केन्द्रितोऽस्ति । वस्तुतः प्रस्तावितविषये शब्दस्य व्युत्पत्तिपूर्वकं नित्यत्वानित्यत्वविचारप्रसङ्गे शब्दतत्वमर्थतत्वं तयोः सम्बन्धञ्चा-श्रित्यानुसङ्गिकध्वनिविषये च परिचर्चा विहिता वर्तते । अपारे संसारसागरे जायमानेषु चतुरशीतिलक्ष्यविधेषु जीवेषु मानवमात्राणां व्यवहारकारणीभूर्तोयं शब्दो व्यावहारिकः पारमार्थिकश्च द्विविधोऽपि वैयाकरणातिरिक्तनैयायिकवैशेषिकमीमां-सकालङ्कारिकादितत्तदाचार्याणांञ्चापरिहारिकोऽनुसन्धेयो ज्ञेयश्च, अत एव कः शब्दः ? कोऽर्थः ? तयोः सम्बन्धश्च कीदृशः ? तेषां नित्यत्वं कार्यत्वञ्च तत्त्वं किमिति स्वाभाविकीं समेषां हृदि जायमानां जिज्ञासामनेनैवानुसन्धानेन परिहर्तुं प्रयते ।*

**शब्दकुञ्जी** : *अनित्यः, अर्थः, ध्वनिः, नित्यः, शब्दः, सम्बन्धः, स्फोटः*

## विषयपरिचयः

व्याकरणशास्त्रे पक्षद्वयं पक्षत्रयञ्च सुप्रसिद्धम्, प्रक्रिया दर्शनं परिष्कारपुरस्सरम्वा । तत्र दर्शनपक्षविधुरं कश्चना अपि सिद्धान्तो लोकप्रसिद्धं चिरप्रतिष्ठाञ्च लभते । तदेव हृदि आदाय समेषां दर्शनपक्षः सुप्रसिद्धः । प्रसिद्धे दर्शनपक्षे च वैयाकरणनिकाये शब्दस्य, अर्थस्य, सम्बन्धस्य च विषये विविधविद्याविद्योतितान्तकरणैःपूर्वापरमहावैयाकरणैर्महाभाष्ये वाक्यपदीये वैयाकरणभूषणसारे भट्टनागेशकृतमञ्जूषादौ च नितान्तं समुत्थापितं विषयं न्यायमीमांसालङ्कारिकाश्चानुमो दन्ते स्वस्वमतानुसारम् । ध्वनिविचारः प्राकृतो वैकृतादिभेदपुरस्सरं नादो नाम परा पश्यन्ती मध्यमा वैखर्य्याऽभिधः । परैव पश्यन्ती स्पन्दशून्योऽनपायिनी वा केचन आचार्याः । मध्यमा वैखर्य्याऽभिधौ कार्यभूतौ परावाङनपायिनी विन्दुरूपा कारणब्रह्मभूता शब्दसत्तातिरिक्तसत्ताकत्वाऽभावरूपमद्वैतमिच्छन्ति वैयाकरणाः । सोऽयं विषयविचारो विद्यतेऽत्र ।

## अध्ययनस्य समस्या

शब्दार्थौ कौ ? तयो : सम्बन्धश्च कः ? इयमेव प्रकृताध्ययने मुख्या समस्या ।

*copyright 2022 © the Author(s) and the Publisher*

## अध्ययनस्य उद्देश्यम्

शब्दमाध्यमेनानुसन्धातणां मनसि शब्दः क ? अर्थः कः? तयोः सम्बन्धः कः? तेषां नित्यत्वमनित्यत्वम्वा इमामेवास्या-ध्यनविषयिणीं समस्याामादाय तस्याः समाधानान्वेषणमस्यानुसन्धानस्योद्देश्यं विद्यते ।

## पूर्वकार्यस्य समीक्षा

यद्यपि शब्दार्थसम्बन्ध विषये विविधेषु प्राचीनग्रन्थेषु मतमतान्तरं परिशीलितं विद्यते तथापि आधुनिक पत्रपत्रिकादौ-विद्यमानो विषयोऽल्पीयान् विद्यते । शब्दस्य विषये, अर्थस्य विषये, सम्बन्धस्य विषये तेषां नित्याऽनित्यत्वविषये बहोः कालात् पूर्वाचार्यैः परिशीलिते समीक्षिते सत्यपि वर्तमाने प्रायः शब्दत्वमर्थत्वं सम्बन्धत्वञ्च अपरिशीलितन्तदर्थञ्चेदमध्ययनमा-वश्यकं मनसि निधाय प्रवर्तमानं कार्यं सर्वसौलभ्येन भवेदिति ।

## अध्ययनविधिः

शब्दार्थसम्बधानां विवेचनायां तेषां नित्यानित्यानुशीलने च पुस्तकालयीयविधिः प्रमुखाधारत्वेन गृहीतो विद्यते । अनुसन्धानात्मकेऽस्मिन् प्रस्ताविते लेखे विषयविस्तारादिकमे निगमनात्मकविधिरवलम्बितोऽस्ति । शब्दव्युत्पत्यादिकमः प्रधानतया पुस्तकालयस्रोतस्सम्पन्नेऽप्यस्याः कृतेः सन्दर्भप्रदाने तथैवाऽन्यप्राविधिके सन्दर्भस्रोतःप्रदाने च वर्तमाने प्रसिद्धा (एपीए) विधिरवलम्बिता वर्तते ।

## विषयविस्तारः

शब्दयति = ज्ञापयत्यर्थं यः सः शब्दः कार्यरूपः । शपमज्ञानादिमूलं संसारं द्यति=अवखण्डयतीति शब्दः कारणरूपो ब्रह्मात्मकः, अथवा शपति माययाऽवृतत्वादाक्रोशतीति शब्दो जीवः । शप्धातोः "शाशपिभ्यां ददनौ" इत्यौणादिकसूत्रेण दन् प्रत्ययेऽनुबन्धलोपे पकारस्य बकारे च कृते सिद्ध्यति शब्दशब्दः । लोके कर्णग्राह्यो गुणः पदार्थविशेष इत्यर्थः । (राजा राधाकान्तदेव, २००२ पृ.२१) । इदमत्राऽवधेयम् - ज्ञपति अर्थमाक्रोशति श्रोतुः प्रतीतिपथमवतारयितुमिति वा शब्दः, आभ्यन्तरो बाह्यश्च आभ्यन्तरो नादरूप आन्तरार्थवान् बाह्यश्च, ध्वनिरुपः श्रोत्रेन्द्रियविषयो घटपटादिरूपो बाह्यार्थवान् । द्विविधोऽपि शब्दो जगत् व्याप्नोति, जगच्च शब्दं व्याप्नोति ।

भाष्यकृता पतञ्जलिना – शब्दस्वरूपविषये गौरित्यत्र कः शब्द इति शब्दविषयिणीं जिज्ञासां कृत्वा श्रोत्रग्राह्या वर्णा एव शब्दवाच्या भवन्त्युत्तरेऽपि गकारौकारविसर्जनीयरूपा वर्णा एव शब्द इति का नवीना जिज्ञासा महर्षि-पतञ्जलेरितिन वाच्यम्, कः शब्द इत्यस्य गूढाभिप्रायत्वात् । तत्र तत्र प्रतिभासमानेषु द्रव्यक्रियाजात्यादिषु कः शब्दशब्दाऽभिधेयो गौरित्यभिप्रायः । तत्र वर्णास्तु न कथमपि तदभिधाने समर्थाः तेषामनित्यत्वम्, असमुदितत्वात् । किञ्च सास्नालाङ्गुलाद्यर्थरूपं तदिङ्गितं चेष्टितं तच्छुक्लो नीलंस्तदभिन्नेष्वभिन्नं सामन्यभूतमित्यादिकं द्रव्यक्रियागुणाकृतिरूपमपि न शब्दशब्दवाच्यम्, श्रोत्रेन्द्रियातिरिक्तेन्द्रियग्राह्यत्वादुच्यते –किंयत्तत्सास्नालाङ्गुलककुदखुरविषाण्यर्थरूपं स शब्दः ? न द्रव्यं नाम तत् । यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः ? नेत्याह क्रिया नाम सा । यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः ? नेत्याह गुणो नाम सः । यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः ? नेत्याह आकृतिर्नाम सा । कस्तर्हिशब्दः, येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः । अर्थात् येन स्फोटेनोच्चारितेन प्रकाशितेन सास्नादिमत्या गोव्यक्तेर्ज्ञानं भवति स स्फोटः शब्दशब्दाऽभिधेयः । अत्रस्थः स्फोटशब्दः श्रोतुरन्तर्गत एव गृह्यते येनोच्चारितेनास्य तत्रैव सार्थक्यदर्शनात् । स च नाभिनवः किन्तु वक्तुरन्तस्थ एव शब्दः श्रोतुर्हृदयमधिरोहति । इदमेव च सकलभाषावयभूतस्य शब्दस्योत्पत्तौ बीजम् । यदुच्चारयिता स्वाभिप्रायं परानवबोधयितुं स्वहृदयस्थितं तं शब्दं ताल्वादिव्यापारैर्बहिः प्रकाशयति । प्रकाशितो भाषितो वा वर्णरूपोपपन्नः स शब्दो वीचीतरङ्गवत् कर्णशष्कुल्यवच्छिन्नाकाशमार्गेण श्रोतुः अन्तर्देशमनुप्रविश्य पुनः स्फोटतां लभते । मध्ये कञ्चित् ध्वनिरूपेण भ्राम्यन्नपि स भूयः श्रोतुर्मध्यमवाचमवाप्य एव अर्थबोधकतां याति । अत एव "अइउण्" इति माहेश्वरसूत्रे पतञ्जलिः "श्रोत्रोपलब्धिर्बुद्धि-निर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः" एतादृशैश्चतुर्भिविशेषणैस्तल्लक्षणं प्रोक्तवान् । तस्माद् वक्तृश्रोत्रोरुभयो-र्मध्यमवाचि स्फोटोऽनुक्रमं संघटते इत्यपि बोध्यम् । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दस्तद्यथा –शब्दं कुरु शब्दं मा कार्षीः, शब्दकारी अयं माणवकः (बालकः) इति ध्वनिं कुर्वन्नेवमुच्यते । तस्मान्नैयायिकमते ध्वनिरेव शब्दः (पतञ्जलिः,

सन् १९८७,पृ.१९) ।

नैयायिकमते कार्यरूपत्वादनित्यः शब्दस्तेषामते वीचीतरङ्गकदम्बगोलकन्यायेन वा अर्थबोधजनकत्वसिद्धिः । वैशेषिकादिदर्शनानुसारेण तु शब्द आकाशविशेषगुणस्वरूपः । सौगतमते तु स वाद्यात्मकत्वाद्द्रव्यस्वरूपमेवानित्यः ।। वैयाकरणास्तु – शब्दो नित्यो ब्रह्मस्वरूपश्च । उक्तञ्च हरिणा –

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।**

**स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥** (भर्तृहरिः, २०७२, पृ.९०)

अपि च ब्रह्मरूपत्वम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥** (भर्तृहरिः, २०७२, पृ.१)

आलङ्कारिका अपि शब्दस्य विभुत्त्वं ब्रह्मत्वञ्च स्वीकुर्वन्ति । तद्यथा –

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।**

**यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते ॥** (दण्डी, १९९९ पृ.१५)

यत्र यत्र यद् यद् भासते तत्र तत्र तत्तदात्मरूपेण शब्द एवावभासते ।

अतो विभुत्त्वं ब्रह्मत्वं नित्यत्वञ्च शब्दस्यैतेषाम्मते सिद्ध्यति ।

वेदान्तिनस्तु –

**क्षितौ चटचटाशब्दो जले बुदबुदुध्वनिः ।**

**वह्नौ भुगुभुगुध्वनिर्वायौ बीसीति शब्दनम् ॥** (मुनिः, १९४९, पृ. ३२)

एवं हि सर्वेष्वपि भूतेषु शब्दस्थितिरप्रतिहता । भर्तृहरिणा जगदेव शब्दस्य कार्यत्वं साधितम् –

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।**

**छन्दोभ्य एव प्रथममेतद् विश्वं प्रवर्तते ॥** (भर्तृहरिः, २०७२, पृ.१७६)

इत्युक्तत्वात् सतात्त्विकोन्यथाप्रथा परिणामः, अतात्विकोऽन्यथा प्रथा विवर्त इत्युदीरितः । वस्तुतः वैयाकरणैर्वेदान्तिभिश्च शब्दस्य विवर्तवाद एव सर्वथा प्रमाणीकृतः । परिणामशब्दोऽपि वैयाकरणमते विवर्तपरकः । विवर्तो नाम लोके यथा रज्जोः सर्पः, मरुमरीचीनाञ्चापः । स च शब्दो व्यवहारदृष्ट्या द्विविधो भाषालक्षणस्तद्विपरीतलक्षणश्च । आद्योऽक्षरात्मको द्वितीयोऽनक्षरात्मकः । तत्राद्यः शास्त्रारम्भकव्यवहारप्रयोजकः संस्कृतादिरूपः । द्वितीयस्तु विषयसूक्ष्मज्ञानप्रतिपादकः । अभाषात्मकोऽपि द्विविधः प्रयोग–विखसानिमित्तभेदात् । तत्राद्यस्तत–वितत–घन–सौवीरभेदैश्चतुर्विधः । यथा ततो भेर्यादिभवः । विततस्तन्त्रीजन्यः । घनस्तालघण्टाद्यभिघातजः । सौवीरो वंशशङ्खादिजन्यः । द्वितीयविखसा तु मेघादिजन्यः स्वाभाविकश्च । नैयायिकवैशेषिकमते शब्दोऽनित्यः । मीमांसकमते सदा नित्यः । वैयाकरणमते तु शब्दो द्विविधः नित्योऽनित्यश्च । नित्यः: स्फोटात्मकः पराख्यः । कार्यश्च वर्णात्मकः । एषोऽपि कार्यशब्दः स्फोटात्मकस्य नित्यशब्दस्यैव विवर्तः ।

**शब्दस्य नित्यत्वानित्यत्वविषये सूत्रकारमतम्**

वैयाकरणराद्धान्ते सूत्रकारेणापि शब्दस्य नित्यत्वानित्यत्वप्रतिपादनपरकाणि लिखितानि बहूनि सूत्राणि । तद्यथा–

पृषोदरादीनि यथोपदिष्टम् । कार्यत्वे तु अस्तेर्भूः । ह्रस्वनद्यापो नुट् । झलां जश् झशि इत्यादीनि । शब्देषु ह्यपूर्वं शब्दोपजनरूपागमसत्वेऽपि स्थान्यादेशभावसत्वेऽपि च न नित्यत्वहानिः । उक्तमेवाचार्यैः– शब्देऽसन्नागमः स्थान्यादेशभावो वा शास्त्रेण नोपजायते किन्त्वागमविशिष्टविषया आदेशविषया वा बुद्धिरेव अन्योपजायते इति वियदादिवच्छब्दानामप्रतिहतं व्यावहारिकनित्यत्वम् ।

**शब्दार्थसम्बन्धानां भेदविचारः**

शब्दो हि द्विविधः अन्वाख्येयः प्रतिपादकश्च । अर्थोऽपि द्विविधः अपोद्धारपदार्थः स्थितलक्षणश्च । तयो सम्बन्धोऽपि द्विविधः कार्यकारणभावो योग्यता च, फलमपि द्विविधं धर्मोऽर्थावबोधश्च । एतावदेव व्याकरणशास्त्रस्य प्रतिपाद्यशरीरम् ।

एक एवापि शब्दः शक्तिव्यपाश्रयादि्भन्न इव प्रतिभाति । तेनैवोक्तं हरिणा –

**एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।**

**अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव भासते ॥** (भर्तृहरिः, २०७२, पृ. ११)

नैयायिकमते ह्यपभ्रंशे शक्तिर्हि साधुशब्दसम्बन्धेनैव किन्तु वैयाकरणमते तु साधुशब्दस्थाने प्रयुक्तस्यापभ्रंशस्य कामं साधुव्यवहित एवार्थोऽभिधीयेत किन्तु ये खलु परम्परातः प्रसिद्धा अपभ्रंशशब्दास्तेषां न हि साधुवाचकत्वम् अपि तु स्वत एव तदज्ञातसाधुशब्दस्यापि तस्यार्थबोधानुभवात् । यथाऽऽह हरिः –

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।**

**तेन साधुष्ववहितः कश्चिदर्थोऽभिधीयते ॥** (भर्तृहरिः, २०७२, पृ. २३३)

**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।**

**प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥** (भर्तृहरिः, २०७२, पृ. २३३)

यस्य च न पारम्पर्यं न च साधुशब्दसम्बन्धस्तादृशो हि शब्दो नैव वाचको भवति । यथोक्तं हरिणा –

**उभयेषामविच्छेदादन्यशब्दविवक्षया ।**

**योऽन्यः प्रयुज्यते शब्दो न सोऽर्थस्याभिधायकः ॥** (भर्तृहरिः, २०७२, पृ. २३५)

**शब्दार्थसम्बन्धविषये पतञ्जलेर्मतम्**

यद्येषो नित्यः अथापि कार्यः । उयथाऽपि लक्षणं प्रवर्त्यमिति नित्यः शब्दो नित्यस्तदर्थस्तयोः सम्बन्धोऽपि नित्यः । तत्र नित्यः शब्दो नित्योऽर्थ इत्याकृतिनिर्देशः, जातिर्हि नित्या, व्यक्तेस्तु –प्रत्यक्षेणैवोत्पादविनाशानुभवात् । शब्दार्थसम्बन्धस्तु स्वरूपेणैव नित्यः सिद्धः समवायवत् । तेनैव आकृतिनित्यत्वान्नित्यः शब्दः । अथाकृतिं शब्दाभिधेयमङ्गीकृत्यैव व्याकरणं प्रवर्तते । शब्दस्य नित्यत्वादर्थस्य च तत्समवायादर्थस्यापि नित्यत्वमेव । एवञ्च तयोः सम्बन्धोऽपि नित्यः । शब्दार्थयोः सोऽयमित्यभिसम्बन्धो भवति । तदुक्तम् –

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥** (कौण्डभट्टः, २०४५ पृ. २०३)

स च योग्यतारूपः सम्बन्धः समयोपाधिक इति तत्तदर्थे शब्दस्य संकेतग्रहण एव गृह्यत इति नायोग्यार्थबोधकत्वं शब्दस्य । तदेवं समयोपाधिः शब्दार्थयोर्योग्यतारूपः सम्बन्ध इति द्वितीयः पक्षः ।

यद्वा शब्दार्थयोः कार्यकारणभावरूपः सम्बन्ध इति तृतीयः पक्षः । तथा हि –समारोपेण बाह्यार्थतादात्म्यापन्नस्यार्थाकारप्रत्ययस्य बौद्धार्थविषयकत्वेऽभ्युपगम्यमाने शब्दस्यार्थाकारं प्रत्ययं प्रति कारणत्वात् तत्तादात्म्येन बाह्यार्थं प्रति कारणत्वमुपपन्नमिति रीत्या नित्यमविच्छिन्नपारम्पर्यः कार्यकारणभावः शब्दार्थयोः सम्बन्ध इति सिद्धम् । अयमपि सम्बन्धः समयोपाधिक एव, समयसहकारेणैव शब्देनार्थकारप्रत्ययजननात् । बाह्यार्थेऽर्थाकारप्रत्ययतादात्म्यञ्चाध्यासिकं बोध्यम् । बौद्धार्थ एव शब्दस्य वाच्यः कार्यञ्चेति तु फलितम् । तत्तादात्म्येन तु बाह्यार्थेऽपि तत्वव्यवहारः । तदुक्तम् – तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशाद् बुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्तीति ।

एवं शब्दार्थसम्बन्धानां नित्यत्वे व्यवस्थिते सूत्राणामारम्भादेव शब्दादीनां नित्यत्वमभिमतं सूत्रकृतः । नहि शब्दादीनामनित्यत्वे शास्त्रारम्भे किञ्चिदपि प्रयोजकमस्ति । यतस्तदा शब्दव्यवहारमात्रं शब्दादीनामनित्यत्वेनानियतार्थकमिति महान्तोऽपि शिष्टाः पाणिन्यादयस्तं शास्त्रप्रणयनाय समनुसर्तुमक्षमाः , अननुगतत्वात् । किञ्च शब्दादीनामनित्यत्वे तेषां व्यवहारमात्रं नाभ्युदयार्थम्, स्वयं कल्पितत्वात्, शारकीडादिवत्, इत्यतोऽप्यनर्थकत्वाच्छिष्टाः शब्दव्यवहारं समनुगन्तुं नार्हन्तीति । तस्मान्नित्यत्वेन व्यवस्थितसाधुभावेषु शब्देषु सत्सु व्याकरणशास्त्रं प्रवृत्तमित्यायातम् ।

**वार्तिककारमतम्**

सिद्धे शब्दार्थसम्बन्ध इति, सिद्धं तु नित्यशब्दत्वादिति च । श्लोकवार्तिककृता कुमारिलेनापि शब्दानां नित्यत्वमुक्तम् –

**स्फोटः शब्दो ध्वनिस्तस्य व्यायाम उपजायते ।**

अस्यार्थः – स्फोट एव शब्दो वाचकस्तस्य व्यञ्जको ध्वनिस्तु व्यायामे कण्ठताल्वाद्यभिघातानुकूले पुरुषप्रयत्ने सत्युपजायत इति ध्वनेर्व्यायामजन्यतया कृतकत्वम् । स्फोटस्य तु तद्व्यतिरेकेण कारणानुपलब्ध्या च नित्यत्वमिति ।

**सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।**

**एकदेशविकारे हि नित्यत्वं नोपलभ्यते ॥** (पतञ्जलिः, १९९९, पृ. २९५)

इत्यभियुक्तवचनपपि शब्दानां नित्यत्वं व्यवस्थापयति । सर्वादेशत्वे शब्दनित्यत्वरक्षा तु बुद्धिविपरिणामेन बोध्या । पचतिबुद्धिप्रसङ्गे पचतुबुद्धिः कर्त्तव्येति बुद्धीनामेव स्थान्यादेशभावो न शब्दानाम् । भाष्येऽपि शब्दादीनां नित्यत्वमुक्तम् – संग्रह एतत् प्राधान्येन परीक्षितं नित्यः शब्दः इति । सिद्धे शब्दार्थसम्बन्धे इत्यनुतन्त्रभाष्येप्युक्तम् –नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम् इत्येवमादि ।

यदि तु शब्दानां व्यावहारिकं नित्यत्वम् । न वस्तुभूतम्, वस्तुभूतं नित्यत्वन्त्वद्वयस्य ब्रह्मण एव । अस्मिन्नये शब्दानामपि वियदादिवदनित्यत्वाद् अवस्तुभूतत्वाच्च । तथापि शब्देष्वपूर्वशब्दोपजनरूपागमसत्त्वेऽपि स्थान्यादेशभावसत्त्वेऽपि च न नित्यत्वहानिः । तत्र दृष्टान्त उक्तो भाष्ये – खदिरबर्बुरौ सूक्ष्मपर्णौ गौरकाण्डौ । तत्र कण्टकवान् खदिरः इति । अयं भावः– यथा खदिरबर्बुरयोरुभयोरपि सूक्ष्मपर्णत्वगौरकाण्डत्वरूपधर्मसाम्येन । खदिरबुद्धि प्रसङ्गे कण्टकवान् खदिर इति वाक्येन न तत्रासन्तः कण्टका आधीयन्ते,किन्तु केवलं पूर्वा उभयोः खदिरत्वबुद्धिर्निवर्त्यतेऽन्या च खदिर एव खदिरत्वबुद्धिरुपजायते । एवं प्रकृतेऽपि शब्देऽसन्नागमः स्थान्यादेशभावो वा शास्त्रेण नोपजायते, किन्त्वागमविशिष्टविषया आदेशविषया वा बुद्धिरेवान्योपजायत इति वियदादिवद् व्यावहारिकं नित्यत्वं शब्दानामव्याहतम् । तथा च सूत्रवार्तिकभाष्याणां प्रामाण्यस्य लोके व्यवस्थितत्वात् तान्यनुसृत्य नित्याः शब्दार्थ सम्बन्धा इति स्थितम् ।

**शब्दार्थसम्बन्धानाम्भेदवैशिष्ट्यम्**

अस्मिश्च व्याकरणशास्त्रेऽष्टौ पदार्था अनुगम्यन्ते, एतच्छास्त्रप्रतिपाद्यानां शब्दार्थसंबन्धफलानां चतुर्णां प्रत्येकं द्वैविध्यात् । तथा हि – अर्थास्तावद् द्विविधाः । अपोद्धारपदार्थाः स्थितलक्षणाश्चेति । शब्दा अपि द्विविधाः । अन्वाख्येयाः प्रतिपादकाश्चेति । संबन्धोऽपि द्विविधः । कार्यकारणभावः, योग्यता चेति पूर्वमुक्तः । फलमपि द्विविधम् । धर्मः(अदृष्टम्), प्रत्ययः(अर्थावबोधः) चेति । एतावदेवास्य व्याकरणशास्त्रस्य प्रतिपाद्यशरीरम् । अपोद्धारपदार्था इत्यत्र – अपोद्ध्रियन्तेऽत्यन्तसंसृष्टात् पदार्थाद् वाक्यार्थाद्वा पृथक् क्रियन्त इत्यपोद्धाराः प्रकृतिप्रत्ययार्थाः पदार्था वा, ते च ते पदार्थाश्चेति कर्मधारयः । पद्यते गम्यतेऽनेनार्थ इति पदम्, न तु पारिभाषिकं सुप्तिङन्तलक्षणम् ।

यद्वा अपोद्धाररूपाणि यानि पदानि, तेषामर्था इति कर्मधारयगर्भः षष्ठीतत्पुरुषः । अथवा अपोद्धारेण पदे प्रकृतिप्रत्ययादिविभागकल्पनया वाक्ये वा पदविभागकल्पनया परिकल्पिता ये पदार्था इति शाकपार्थिवादित्वात् मध्यमपदलोपी समासः । अपोद्धारस्य संबन्धिनो वा ये पदार्था इति षष्ठीतत्पुरुषः । अपोद्धारोऽत्र विभागः । तत्रापोद्धारपदार्थो नाम यः सदा संसृष्ट एव, न तु विभागपूर्वकं संसृष्टः पदार्थो वाक्यार्थो वा प्रकृत्यर्थप्रत्ययार्थादिरूपेण पदार्थरूपेण वा परिकल्पितेन रूपेण प्रकल्पितप्रविभागः सन् अत्यन्तसंसृष्टात् रूपात् पृथक् क्रियते सः । यतः प्रविभक्तैः पदार्थैन प्रवृत्तिनिवृत्तिलक्षणो व्यवहारः पुरुषस्य भवति, अपि तु संसृष्टैरेव । अतः प्रविभक्तस्य तस्यार्थस्य व्यवहारातीतं रूपम्, अत एव तत् कल्पितम्, न तु वास्तवम् । तञ्च रूपं यथाशास्त्रं स्वान् स्वान् प्रत्ययान् अनुसरद्भिराचार्यैः स्वस्वप्रत्ययानुसारेण-तत्तत्प्रकृत्यर्थप्रत्ययार्थादिविषयकभावनाऽभ्यासवशात् प्रायेण विभागकल्पना व्यवस्थाप्यते ।

न चेयं विभागकल्पनाऽपोद्धारपदार्थेष्वेव केवलम्, किन्तु स्थितलक्षणेष्वपि केषुचिदर्थेषु, यथा सिंह हंसादिपदार्थेषु । तत्रापि हि हिनस्तीति सिंहः, हन्ति गच्छतीति हंसः – इत्येवं प्रकृत्यर्थ प्रत्ययार्थादिकल्पना क्रियते । एवं द्वारमित्येकप-

दसरूपवाक्यप्रतिपाद्येष्वपि स्थितलक्षणेषु वाक्यार्थेषु पदार्थरूपोऽपोद्धारो बोध्यः । न चैवं सत्यपोद्धारपदार्थस्थितलक्षणपदार्थभेदेन पदार्थद्वैविध्यमनुपपन्नमिति वाच्यम् । मणिनूपुरादिपदार्थेषु स्थितलक्षणेषु सर्वथा अपोद्धारविरहात् । एवं न केवलं शब्दा एवापोद्ध्रियन्ते किन्तु शब्दार्था अपि । तथाहि– पदार्थवाक्यार्थवद् अप्रविभागे पदरूपे वाक्यरूपे वा शब्दात्मनि प्रकृति-प्रत्ययादिरूपाः पदरूपा वा शब्दाः प्रविभज्य कल्प्यन्ते । तेषां चाभिधेयत्वेनापोद्धारपदार्थाः प्रकृत्यर्थप्रत्ययार्थादिरूपाः पदार्थरूपा वा आश्रीयन्ते । सोऽयमपोद्धारपदार्थः प्रकृत्यर्थादिरूपः शास्त्रव्यवहारमेव केवलमनुपतति न लौकिकं व्यवहारम्, तत्र तेषामभावात् । पदार्थरूपस्त्वपोद्धारपदार्थः शास्त्रव्यवहारमिव लौकिकं पदार्थवाक्यार्थयोर्भेदव्यवहारमप्यनुपतति ।

स चैकपदनिबन्धनोऽनेकपदनिबन्धनश्चेति द्विधा । तत्रैकपदनिबन्धनोऽपोद्धरपदार्थः सत्यासत्यरूपतयाऽनुपाख्येयः । यथा वृक्षः प्लक्ष इति । सत्क्रियायोगेऽर्थस्य सत्यत्वम्, असत्क्रियायोगे तु तस्यासत्त्यत्वं प्रतीयते । यथा वृक्षः फलति, वृक्षो दह्यत इति यथाक्रममुदाहरणम् । केवलवृक्षादिपदप्रयोगे तु तद्द्वयमपि न प्रतीयते । अनेकपदनिबन्धनस्तूपनीतक्रियः सत्त्यासत्त्यान्यतररूपेणोपाख्येयो भवत्येव । यदा वृक्ष इति केवलं नामपदं प्रयुज्यते, तदा बहूनां तदर्थान्वययोग्यानां क्रियाणामहमहमिकयोपस्थितिः । ततश्च तासां क्रियाणामपवादभूतास्तात्पर्यविषयीभूता अवधार्यमाणाः क्रियाविशेषाः प्रयुज्यमाना यावच्छब्दमात्रप्रवृत्तिकारणमस्तित्वं न निवर्तयन्ति तावदस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि वृक्षादिभिः पदैराक्षिप्तः प्रतीयते, क्रियासामान्यवचनत्वात् । क्रियाविशेषवचनानि तु धातुपदानि नाक्षिप्यन्ते, विनिगमनाविरहात् । क्वचित्तु प्रकरणादिना सति तात्पर्यग्रहे क्रियाविशेषोऽप्याक्षिप्यते । यथा द्वारमित्युक्ते पिधेहीति । तानि च केवलानि प्रयुज्यमानानि वृक्षादिपदान्येकपदसरूपाण्यक्षिप्तक्रियापदानि सन्ति वाक्यानीत्याख्यायन्ते । क्रियारूपस्यार्थस्यैवाक्षेपः प्राभाकरैः स्वीक्रियते, लाघवात् क्रियापदस्य । तेषामपि मतेऽत्यन्तं संसृष्टाद् वाक्यार्थात् पदार्थोऽपोद्ध्रियत इत्युपपन्नमेव ।

एवमत्र स्थितलक्षणेऽपि वाक्यार्थे पदार्थापोद्धारः संभवति । न त्वेकपदप्रयोगेऽप्यनपोद्ध्रभृतः पदार्थोऽस्ति, तत्राप्यन्ततोऽस्तिक्रियासंसर्गसत्त्वात् । तथा पदार्थेऽपि पदार्थापोद्धारः पूर्वपदार्थः, उत्तरपदार्थः, अन्यपदार्थ इति वृत्त्यर्थात्, प्रातिपदिकार्थ इति पदार्थात्, धात्वर्थ इत्याख्यातार्थात्, प्रत्ययार्थ इति प्रातिपदिकार्थाद् इत्येवमेकपदवाच्योऽप्यनियतावधिरर्थो बहुधा प्रविभज्य कैश्चित् कथञ्चिदपोद्ध्रियते । तदेवमपोद्धारपदार्थाः प्रकृत्यर्थप्रत्ययार्थादयः, पदार्थरूपाश्चेति द्विविधाः ।

स्थितम् = स्थिरं लक्षणम् = स्वरूपं येषां ते स्थितलक्षणाः, स्वरूपस्याप्रच्युतेः, । ते च मतभेदेन पदार्थरूपा वाक्यार्थरूपाश्च । तत्र यथा प्रकृतिप्रत्ययार्थाः पदार्थप्रतिपत्तावुपायतया पदार्थे प्रतिपन्नाः तत्रैव तिरोधीयन्ते, न तु पदार्थाः क्वापि तिरोधीयन्त इति स्थितलक्षणा इत्येकं मतम् । एवं पदार्था अपि वाक्यार्थप्रतिपत्तावुपायतया प्रतिपन्ने वाक्यार्थे तत्रैव तिरोधीयन्ते, न तु वाक्यार्थः क्वापि तिरोधीयत इति वाक्यार्थ एव स्थितलक्षण इत्यपरं मतम् । अयमेव सिद्धान्तः। अन्पाख्येयाः प्रतिपादकाश्चेति द्विविधाः शब्दाः । अन्वाख्यानं नामानादौ संसारे तादृशव्यवहारे दृष्टानां शिष्टप्रयुक्तानां शब्दानां व्याकरणशास्त्रेण प्रकृतिप्रत्ययविभागादिद्वारेण साधुत्वबोधनम् । तत्र केषाञ्चिद् वादिनां पदावधिकमेवान्वख्यानं व्याकरणेन क्रियत इत्याभिप्रेतम्, पदानां नियतत्वात् । वाक्यानां तु पदानां पूर्वापरीभावस्यानियत्त्वेनानियतत्वमेवेति वाक्यान्वाख्यानस्याशक्यत्वमिति तेषामभिप्रायः ।

मुनित्रयाभिमतमिव भर्तृहरिणा इयं कारिका प्रसारिता -

**नित्याः शब्दार्थसम्बन्धाः, तत्राम्नाता महर्षिभिः ।**

**सूत्राणां सानुतन्त्राणाम्भाष्याणाञ्च प्रणेतृभिः ॥** (भर्तृहरिः, २०७२, पृ. ४१)

**शब्दार्थसम्बन्धाऽभिजनकध्वनिविचारः**

शब्दो नित्यः, अर्थो नित्यः सम्बन्धोऽपि नित्यः एवं सत्यपि अर्थवाचकस्तु स्फोट एव, ध्वनिस्तु तस्यैवाऽभिव्यञ्जको वर्तते । द्विधा ध्वनिर्हेतुमाह वैकृतं ध्वनिं वृत्तिभेदे निमित्तम् । तदुक्तं संग्रहकारः –

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।**

**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥** (भर्तृहरिः, २०७२, पृ. १३०)

यथा प्रकाश उद्यन्नेव पटादिभ्यो भिन्नं घटं प्रकाशयति पश्चात् प्रकाशेन पुनः पुनर्दृश्यमानोऽपि घटः,

न पूर्वप्रकाशिताद्घटात् भेदमालम्बते तथैव प्राकृतध्वनिरेव भिन्नं स्फोटमभिव्यञ्जयति । अनन्तरं वैकृत ध्वनिस्तु पूर्वाभिव्यक्तस्यव तावत्कालमुपलम्भे हेतुर्भवति न तु पूर्वादभिव्यक्ताद्भिन्ने ।

अत एव द्रुतविलम्बितादिवृत्तिभेदेऽपि अकार एव पुनः पुनरुपलभ्यते । तमेवायं विलम्बितमुच्चारितवान् अन्यो द्रुतमित्यनुभवात् । ह्रस्वदीर्घयोस्तु नैवमनुभवः । यथा गन्तृणामालस्यात् गतिभेदेऽपि न मार्गभेदः । तथैव सर्वासु वृत्तिषु न वर्णानामुपचयापचयः । एवमालस्यादिनोच्चारणक्रियया वैकृतध्वनिभेदेऽपि न वर्णस्वरूपभेदः ।

ह्रस्वदीर्घप्लुताश्च स्वत एव भिन्ना, भिन्नैर्ध्वनिभिर्व्यज्यन्त इति युक्तस्तेषां कालभेदः । यथा भेरीमाहत्य कश्चित् विशति पदानि कश्चिदन्यः, त्रिंशत् अपरश्च चत्वारिंशत् पदानि गच्छति स्फोटस्तावानेव ध्वनिकृता बुद्धिर्वृत्तीषूपलब्धीनां कालभेदो विषयस्य तु अभेद एव ।

प्राकृतध्वनिमेव तार्किका वाचकं शब्दं मन्यन्ते । वैकृतं ध्वनिमुपगच्छन्ति ।

व्यङ्ग्यर्थव्यञ्जकधर्मानुगमदर्शनेन स्वतः कालभेदरहितेष्वेव वर्णपदवाक्येषु प्राकृतवैकृतध्वनिभेदात् द्रुतादिकालः स्वकालः स्वीयस्य स्वाभिव्यञ्जकस्य प्राकृतध्वनेः मात्रादिकालभेदश्च विभाव्यते ।

प्राकृतः स्फोटोऽध्यस्यमानः ह्रस्व–दीर्घ–प्लुतव्यवहारकारणं भवति । वैकृतस्तु शब्देऽवधारिते भवन् गृहीतभेदत्वात् नाध्यासनिमित्तं किन्तु बाह्यद्रुतादिकालव्यवस्था कारणं भवति । तावत्कालस्फोटोपलम्भकारणं भवति । तेन न स्फोटभेदः । ह्रस्व दीर्घत्वादिकं तु ध्वनिधर्म एव ।

ध्वनिरूपः शब्दो द्विविधः । उत्तरोत्तरशब्दानां कारणरूपः प्राकृतः। कार्यरूपश्च वैकृतः । आद्यः स्फोटव्यञ्जकः, अपरो वैकृतः तत्रापि भेरीदण्डाभिघातजस्य परम्परापूरमनुपतति लोहकांस्याभिघातजस्य प्रत्यासन्नम् ।

यथा प्रदीपः प्रभया सहोत्पद्यते तथैव स्फोटो ध्वनिना सहोत्पद्यते । दूरात्प्रभामात्रं लक्ष्यते न दीपः, दूरतस्तथैव ध्वनिमात्रं लक्ष्यते न शब्दः (स्फोटः ) । घण्टादीनां शब्देषु भेदोऽयं स्फुटः ।

केचिद्वीचीतरङ्गन्यायेन सर्वासु दिक्षु शब्दप्रसरो न सम्भवतीति कदम्बमुकुलन्यायेन सर्वदिक्षु प्रसरति । तत्र कार्यभूतानां वैकृतध्वनीनां वशेन कारणभूताः स्फोटशब्दा अकारादयः प्रचिता उपचिता व्यवह्रियन्ते ।

उच्चैरुच्चारिते ह्रस्वे अकारे केवलं ध्वन्यधिकदेशं व्याप्नोति । अकारस्तु न भिद्यते ।

द्रव्याभिघातात् ध्वनिकारणवायुसंयोगप्रचयात् दीर्घप्लुतयोः प्रचयः । अधिककालं वादितायां घण्टायां कम्पोऽनुवर्तते । स्पन्दे उपरते सञ्जाता नादा वैकृतध्वनयः । तैरेव द्रुतादिव्यवस्था भवति । शब्दानित्यत्वपक्षे तु ह्रस्वत्वादयोऽकारादिधर्मा एव ।

अन्येषां रीत्या तु कम्पेऽनिवृत्तेऽपि ज्वालान्तराज्ज्वला इव स्फोटादेव वैकृतध्वनयो जायन्ते । केषाञ्चित् वायोरन्ये षामणूनामपरेषां ज्ञानस्य शब्दत्वापत्तिर्भवति । वेणुशङ्खादिभिरुपहितो वायुः शब्दतां प्रतिपद्यते । तथैव बाह्याभ्यन्तरप्रयत्नो त्थितवायुरेव च कण्ठाद्यभिघातेन वर्णो भवति ।

अन्ये तु सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः परमा एव छायातपतमः शब्दभावेन परिणमन्ते । प्रयोक्तयत्नेन संह्रियमाणाः शब्दत्वापत्तिशक्तियुक्ताः परमाणवः शब्दरूपेण परिणमन्ते । शब्दः पौद्गलिकः इत्यनुमानं तत्र मानम् ।

साधिष्ठानं वृत्तिविशिष्टमन्तःकरणं सूक्ष्मशब्दाकारशक्तिमत्त्वेन स्थितं स्वस्य रूपस्य व्यक्तये शब्दत्वेन विवर्तते ।

**अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥** (भर्तृहरिः, २०७२, पृ. १६७)

तदुक्तं शिक्षायाम् –

**आत्मा बुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।** (पाणिनिः, २०४९, पृ. १८)

**वर्णान् जनयते मतान्तरे तु – ॥**

**अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।**

**व्यजनाद्वायुरिव स स्वनिमित्तात्प्रतीयते ॥** (भर्तृहरिः, २०७२, पृ. १७०)

श्लोकवार्तिके–

**त्रिगुणः पौद्‌गलो वायुमाकाशस्याथवा गुणः ।**

**वर्णादन्योऽथ नादात्मा वायुरूपोऽर्थवाचकः ॥**

**पदवाक्यात्मकः स्फोटः सारूप्यान्न निवर्तते ॥** (भट्टः, २०४७, पृ. ६१)

नादः प्रतीतपदार्थको ध्वनिः शब्दो वायुरूपोऽर्थवाचकः इति शिक्षाकारः । बौद्धैरपोहो वाचकत्वेनोक्तः । यथैवैकस्य ब्रह्मणो भोक्तृभोक्तव्यरूपेणावस्थानम् , तथैवोपायोपेयरूपेणापि तस्यैवावस्थानमिति वेदरूपेणापि तस्यैवाभिर्भावः । तदुक्तम् –

**प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।**

**एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥** (भर्तृहरिः, २०७२, पृ. १६)

स्मृतयोऽपि वेदमूलिका एव । शब्दमूलकाः सर्वे लौकिका वैदिकाश्च व्यवहाराः । शब्दतत्त्वबोधस्तु व्याकरणाधीनः, मोक्षोऽपि तदधीन एव । वाङ्मलानां चिकित्सारूपमपि व्याकरणम् । तदुक्तम् –

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥** (पूर्ववत्, २०७२, पृ.३७) ।

धर्मजनकत्वरूपस्य साधुत्वस्य व्याकरणशास्त्रमन्तरा ज्ञानं न सम्भवति ।

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।**

**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ॥** (पूर्ववत्, २०७२, पृ.१६) ।

न तर्केणागमबाधः, किन्तु शास्त्रेण तर्कबाधः । नरकपालशुचित्वबोधकेनागमेन प्राण्यङ्गत्वेन शङ्खवन्नर कपालशुचित्वबोधकानुमानस्य बाधदर्शनात् ।

धान्यवीजानामङ्कुरजनकत्वेऽपि मूषिकाघातानां तदजनकत्वदर्शनात् । आर्द्रस्य पिप्पल्योषधस्य कफजनकताशक्तेः, शुष्कस्य त्रिदोषशमनशक्तेश्च दर्शनात् ।

एवञ्च शब्दातिरिक्तं न किमपि कार्यजातं सम्भति । शब्दसत्तातिरिक्तसत्ताकत्वाभावात् शब्दस्य व्यावाहांरिकी शास्त्रीया च नित्यता अप्रतिहता ।

**शास्त्रीये व्याहारिके च शब्दनित्यत्वे सिद्धान्तविचारः**

अपराणि च बहूनि शब्दस्य नित्यत्वे साधकानि प्रमाणानि सन्ति यथा –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥** (पूर्ववत्, २०७२, पृ.१८३) ।

इत्युक्तेर्ज्ञानमात्रस्य शब्दाधीनत्वेन शब्दसम्बन्धे शास्त्रे विस्तृतो विचारो दृश्यते । शब्दशास्त्रन्तु महासागर वदपरिमेयस्थशब्दस्यार्णव एव । तत्र शब्दानां व्युत्पन्नाऽव्युत्पन्नसाधने प्रमाणभूताभ्याम् **अर्थवदधातुरप्रत्ययःप्रातिपदिकम्, कृत्तद्धितसमासाश्च,** इति सूत्राभ्यामापि ब्रह्मात्मकस्य करणं कार्यञ्च साधितमेव । तयो : ब्रह्मस्वरूपं मोक्षस्य कारणं च शब्द एव तद्यथा –

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥** (पूर्ववत्, २०७२, पृ.१) ।

शब्दे ब्रह्मणि निष्णातः परं ब्रह्माभिधीयते, काव्यालापाश्च शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः, **एकः शब्दः**

**सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीत्यादयः ।** (पतञ्जलिः, १९९९, पृ. ६१२) ।

अत्र व्याडिकृतलक्षश्लोकात्मके "संग्रह" – नामकग्रन्थे विस्तृतरूपेण शब्दनित्यताया विचारो वर्तत इति पतञ्जलिना कैयटादिना च प्रतिपादितम्, भगवता पतञ्जलिना च **सिद्धे शब्दार्थसम्बन्धे,** (पतञ्जलिः, १९९९, पृ. ४७) । इति वाक्यस्य विस्तृतव्याख्यायां नित्यपर्यायवाचिनं सिद्धशब्दं व्याख्याय सिद्धा द्यौः सिद्धा पृथ्वीत्यादिरूपेण, प्रतिपादित कार्यप्रतिद्वन्द्वीभावस्य च सिद्धशब्दस्य संग्रहे दर्शनाच्च नित्यत्वमेव निगदितम् ।

शब्दार्थसम्बन्धानां नित्यता च लोकतो ज्ञायत एव, तत्र शास्त्रेण धर्मनियमस्य विधानम् । शब्दार्थयोस्तावदेव महाकविना कालिदासेन **वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये**, इत्यनेन रघुवशे शब्दार्थयोर्नित्यसम्बन्धत्वं प्रदर्शितम् ।

अत्र परा, पश्यन्ती, मध्यमा, वैखरीति भेदात्मकेषु वाचश्तुर्षु भेदेष्वद्वयोश्चाभेदादिज्ञानाद्बहिर्भूतत्वेन, मध्यमाया वाचो नित्यता प्रतिपादिता । या च मध्यमा वाक् स्फोटात्मिका अर्थबोधिका नित्या । तथैव वाचात्र सर्वेषामर्थानां स्पष्टतया ज्ञानं भवति । अयमेव प्राकृतध्वनिः । तदनन्तरं वैकृतध्वनिः– वैखरीनादो वर्तते । यश्च सर्वजनसाधारणः श्रोत्रग्राह्यो वैखरी ध्वनिर्वतते वैकृतध्वनिस्तु स्फोटज्ञानेऽर्थस्फोटे कारणं न तेन स्फोटात्मके नित्ये शब्दे कोऽपि भेदो जायते, यथा -

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्नभिद्यते ॥** (भर्तृहरिः, २०७२, पृ. १३२) ।

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते । वृतिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ इत्यादयः ।

एतस्मिन् शब्दनित्यत्वविचारे नैयायिकानामाक्षेपो वर्तते यदुच्चरितानन्तरमेव प्रध्वंसितस्य शब्दस्य कथमपि नित्यता न संपादिता । केवलं पूर्वपूर्ववर्णानुभवसंस्कारसध्रीचीनचरमवर्णानुभवत एव शाब्दबोधो भवति, उत्तरोत्तरवर्णे पूर्वपूर्ववर्णवत्वमव्यवहितोत्तरत्वसम्बद्धेन संस्कारवशाद् गृह्यते, शब्दजशब्दन्यायेन पूर्वपूर्ववर्णजाः शब्दाः चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एवेत्यादिप्रकारैर्वाक्यार्थबोधः प्रतिपादितः ।

तत्र वैयाकरणानां यत् खण्डनं वर्तते नष्टविद्यमानशब्दानामव्यवहितोत्तरत्वसम्बधाशक्यत्वेन, पदस्याविद्यमानतायां शक्तिग्रहानुपपन्नत्वेन, अनुभवक्रमेणैव संस्कारस्थितेरभावत्वेन च – तत्तु वर्तते एव, किन्तु यल्लौकिकं वैज्ञानिकं च स्पष्टप्रमाणं वर्तते तेन शब्दानित्यत्ववादिनां नैयायिकादीनामदूरदर्शित्वं वितण्डावादित्वं च सुस्पष्टं प्रतिभाति ।

लोके दृश्यते यत्परस्परवाक्यस्यादानप्रदाने जना विवदन्ते, प्रहरन्ति तेन म्रियन्ते च । तस्य नाम वाग्युद्धम् । यदि शब्दोऽनित्यस्तर्हि प्रध्वंसितशब्दे का तीक्ष्णता का च मधुरता स्यात् ? यदि च शब्दानामनित्यता चेत्तर्हि कश्चाशीर्वादः कश्चाभिशापः ? कथञ्च तेषामाशीर्वादाभिशापानां स्थायी प्रभावः ? कथञ्च यज्ञेऽनुष्ठाने विवाहादौ च वाग्दानेनैव तेषां स्थायिता पूर्णता च भवति ? कथञ्चानित्यशब्दद्वारा पिण्डदानेन तर्पणे च तेषां प्राप्तिर्भवति ? अस्मदादीनां कृते तु कथमपि नैयायिकरीत्याऽन्तिमवर्णानुभवे तेन बोधस्यापि संभवः, किन्तु देवानां च कृते कथमस्मदुच्चरितानित्यशब्दान्तिमवर्णद्वारा वाक्यानुभवो भवितुमर्हति ? यदि न स्यात्तर्हि कथं तेषां फलं भवति ? यदि न स्यात्तर्हि कथं तेषामाशीर्वादाभिशापानां फलं जायते । यदि देवाः ऋषयश्च सर्वज्ञास्तर्हि वाक्योच्चारणमेव निरर्थकम् ।

अथ चास्मिन् वैज्ञानिकयुगे ग्रामोफोन रोडयो वायरलेस टेलिफोनादियन्त्राविष्कारानन्तरं शब्दनित्यत्वस्य चर्चापि हास्यप्रदा वर्तते । पञ्चाशद्वर्षपूर्वं केनापि गायकेन प्रगीत - गीतमद्यापि तेनैव क्रमेण तेनैवाविकलापरिवर्तिंतरीत्या रेकार्डद्वारा श्रूयते । आकाशवाणीकेन्द्रे प्रसारितं वाक्यं समस्ते संसारे तेनैव स्वरेण श्रूयते, तेषामारोहक्रमोऽप्यनुभूयते । अत्र विचार्य यत् कथमिदं जायते– तत्र त्विदं प्रत्यक्षमिति यत् सर्वे शब्दाश्चाकाशे गच्छन्ति शब्दानुगमकमाकाशम् । तत्र गत्वा ते सर्वे शब्दाः नित्यरूपेण स्थिताः भवन्ति । साधनविशेषद्वारा यत्राविशेषेण तान् शब्दान् बहुकालपर्यन्तं तेनैव क्रमेण सर्वे श्रृण्वन्ति, श्रोतुं च शक्ष्यन्त्यनन्तकालपर्यन्तम् ।

श्रूयन्ते यद्वैज्ञानिकाः गगनमण्डले सुस्थितानि भगवता श्रीकृष्णेनोपदिष्टानि गीतावाक्यानि तेनैवाविकलरूपेण सर्वदा श्रोतुं यन्त्राविष्कारनिर्माणे संलग्ना वर्तन्ते, सफलता च प्राप्स्यन्ति । नात्र कश्चन शङ्कापङ्कलङ्कावसरः ।

इदं च प्रत्यक्षं यच्चन्द्रमण्डले जायमानानां नित्यशब्दानां प्रतिध्वनिं संगृह्य ध्वनियन्त्र (टेपरेकार्ड) द्वाराऽनूद्य तत एव पृथिव्यां ते शब्दाः प्रसारिताश्चन्द्रलोके गमनाऽगमनकर्तारः, अमेरिकास्था वैज्ञानिका रसियास्थाश्च ।

यदि शब्दाश्चानित्याः, उत्पत्त्यनन्तरं विनष्टास्तर्हि कथमुपर्युक्तं नित्यत्वं प्रत्यक्षम् ? कथञ्च शब्देऽपरिमेयाः शक्तयो वर्तन्ते ? कथञ्च शतसहस्त्रलक्षादिसंख्यात्मकजपस्य पुराणादिपाठस्यानिर्वचनीयानि विविधानि फलानि भवन्ति ?

अत एव व्यर्थं तर्कबुद्धिवैशद्यर्थं, विवदन्तु नैयायिकाः शब्दानित्यत्वार्थं, प्रतिवदन्तु च वैयाकरणास्ततखण्डनार्थं न ते न शब्दशक्तेर्व्यापकताया नित्यतायाश्च वैज्ञानिकं प्रत्यक्षप्रमाणमपनेतुं शक्नुवन्ति । परिणामतः शब्दोऽपरिमेयशक्तिमान्नित्यः शाश्वतश्चेति निश्चप्रचम् । श्रुतिस्मृत्यादिभिरपि तेनैव नित्यशब्देन जगदुत्पत्तिर्गीयते तथाहि

**सभूरितिव्याहरत् ,भूमिमसृजत् इति**

**भूरिति वै प्रजापतिः । आत्मानमजनयत भुवऽइति प्रजा ्ं स्वरिति पशूनेतावद्वाऽइद ्ं सर्वं यावदात्मा प्रजाः पशवः सर्वेणैव धीयते ।** शतपथब्राह्मणम् (सन् १९८६, पृ. १२५) ।

**सर्वेषांस तु नामानि कर्माणि च पृथक् पृथक् ।**

**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥** (मनुः, २००३, पृ. ४)

आगमा अपि नादादेव जगदुत्पत्तिमुद्घोषयन्ति, तदेतत् सकलमपि प्रमाणमाकलय्य शब्दतत्वं मनागप्यनित्यत्वम्विभुत्वञ्च न संस्पृश्यते ॥

## निष्कर्षः

नैयायिकैराप्तोच्चरितत्वे सति शब्दज्ञानकरणीभूतवाक्यत्वं शब्दत्वं प्रतिपादितम् । पुनश्च वीचीतरङ्गकदम्ब-मुकुलन्याय्योवाऽर्थबोधने कारणतया स्वीकारेण तस्यानित्यत्वमुक्तम् । वैयाकरणनिकाये तु शब्दो द्विधो नित्योऽनित्यश्च नित्यशब्दस्य अर्थोऽपि नित्यः सम्बन्धोऽपि नित्यः । तदर्थं शब्दशब्दस्य व्युत्पत्तिरर्थापनञ्चावश्यकमतः स्फोटशब्दस्य व्युत्पत्तिलभ्यर्थः सार्थीभवति । शब्दार्थसम्बन्धानां विचारप्रसङ्गे शुद्धबुद्धमुक्तनित्यसच्चिदानन्दघनत्वं शब्दसत्तातिरिक्तसत्ताकत्वाभावरूपत्वञ्च साधितम् । शब्दस्य अर्थस्य सम्बन्धस्य च विषये परापश्यन्त्यादिभेदाश्रयणं प्राकृतवैकृतध्वनिभेदानाञ्च गतिराश्रयणीया । एवमेव शब्दस्य शास्त्रीयस्वरूपं व्यवहारिकञ्च किमिति जिज्ञासां सामाधनञ्चेदानीमावश्यकतां मनसि निधाय सर्वमालोड्य चायमध्ययनम्विहितमिति भावः ।

## सन्दर्भसूची


अन्नम्भट्टः (सन् २००५), *तर्कसङ्ग्रहः,* (द्वि.सं.) वाराणसी : चौखम्बा विद्याभवन ।

चतुर्वेदी रामाधीनः, (२०२०), *संस्कृत भाषाविज्ञानम्,* वाराणसी : चौखम्बा विद्याभवन ।

दण्डी (सन् १९९९), *काव्यादर्शः,* दिल्ली : नाग पब्लिशर्स ।

दीक्षितः, भट्टोजी (सन् १९९५), *वैयाकरणसिद्यान्तकौमुदी,* दिल्ली : मोतिलाल वनारसीदास ।

पतञ्जलिः (सन् १९९९), *महाभाष्यम्,* दिल्ली : प्रतिभा प्रकाशन ।

पाणिनिः (सन् १९८४), *पाणिनीयशिक्षा,* वाराणसी : मोतिलाल बनारसीदास ।

बहादुरः, राधाकान्तदेवः (सन् २००२), *शब्दकल्पद्रुमः,* (पुनर्मु.) नई दिल्ली : राष्ट्रिय संस्कृत संस्थान ।

भट्टः, कुमारिलः (२०४६), *श्लोकवार्तिकः,* वनारस : चौखम्भा संस्कृत सिरीज गोपाल मन्दिर ।

भट्टः, कौण्डः (२०४५), *वैयाकरणभूषणसारः,* वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

भट्टाचार्य विश्वनाथपञ्चाननः, (२०४५), *न्यायसिद्यान्तमुक्तावली,* वाराणसी : चौखम्बा संस्कृत संस्थान ।

भर्तृहरिः (२०७२), *वाक्यपदीयम्,* (पं.सं.) वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

मुनिः, विद्यारण्यः (सन् १९४९), *पञ्चदशी,* (स.सं.) मुम्बई : निर्णयसागर मुद्राणालयः ।

शुक्लः, रामगोविन्दः (२०२६), *वेदस्वरूपविमर्शः,* वाराणसी : चौखम्भा विद्याभवन ।

शतपथब्रहमणम् (सन् १९८६), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस ।

शर्मा पं रधुनाथः (वि.सं. २०२८), *व्याकरणदर्शनविन्दुः,* वाराणसी : वाराणसेय संस्कृत विश्वविद्यालयः ।